# योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ४२



श्रीवसिष्ठ उवाच ।

इत्युक्त्वा पुण्डरीकाक्षः सनरामरकिन्नरः ।

द्वितीय इव संसारश्चचालासुरमन्दिरात् ।। १

प्रह्लादादिविनिर्मुक्तैः पश्चात्पुष्पाञ्जलिव्रजैः ।

पूर्यमाणो विहङ्गेशपाश्चात्याङ्गरुहोत्करैः ।। २

क्रमात्क्षीरोदमासाद्य विसृज्य सुरवाहिनीम् ।

भोगिभोगासने तस्थौ श्वेताब्ज इव षट्पदः ।। ३

भोगिभोगासने विष्णुः शक्रः स्वर्गे सहामरैः ।

पाताले दानवाधीश इति तस्थुर्गतज्वराः ।। ४

एषा ते कथिता राम निःशेषमलनाशिनी ।

प्राह्लादी बोधसंप्राप्तिरैन्दवद्रवशीतला ।। ५

तां तु ये मानवा लोके बहुदुष्कृतिनोऽपि हि ।

धिया विचारयिष्यन्ति ते प्राप्स्यन्त्यचिरात्पदम् ।। ६

सामान्येन विचारेण क्षयमायाति दुष्कृतम् ।

योगवाक्यविचारेण को न याति परं पदम् ।। ७

अज्ञानमुच्यते पापं तद्विचारेण नश्यति ।

पापमूलच्छिदं तस्माद्विचारं न परित्यजेत् ।। ८

इमां प्रह्लादसंसिद्धिं प्रविचारयता नृणाम् ।

सप्तजन्मकृतं पापं क्षयमायात्यसंशयम् ।। ९

श्रीराम उवाच ।

परे पदे परिणतं पाञ्चजन्यस्वनैर्मनः ।

कथं प्रबुद्धं भगवन्प्रह्लादस्य महात्मनः ।। १०

श्रीवसिष्ठ उवाच ।

द्विविधा मुक्तता लोके संभवत्यनघाकृते ।

सदेहैका विदेहान्या विभागोऽयं तयोः शृणु ।। ११

असंसक्तमतेर्यस्य त्यागादानेषु कर्मणाम् ।

नैषणा तत्स्थितिं विद्धि त्वं जीवन्मुक्ततामिह ।। १२

सैव देहक्षये राम पुनर्जननवर्जिता ।

विदेहमुक्तता प्रोक्ता तत्स्था नायान्ति दृश्यताम् ।। १३

भृष्टबीजोपमा भूयो जन्माङ्कुरविवर्जिताः ।

हृदि जीवद्विमुक्तानां शुद्धा भवति वासना ।। १४

पावनी परमोदारा शुद्धसत्त्वानुपातिनी ।

आत्मध्यानमयी नित्यं सुषुप्तस्येव तिष्ठति ।। १५

अपि वर्षसहस्रान्ते तयेवान्तरवस्थया ।

सति देहे प्रबुध्यन्ते जीवन्मुक्ता रघूद्वह ।। ५५

प्रह्लादोऽन्तस्थया शुद्धसत्त्ववासनया स्वया ।

बोधमाप महाबाहो शङ्खशब्दावबुद्धया ।। १७

हरिरात्मा हि भूतानां तस्य यत्प्रतिभासते ।

तत्तथैव भवत्याशु सर्वमात्मैव कारणम् ।। १८

प्रबोधमेतु प्रह्लादो यदैवेति विचिन्तितम् ।

निमेषाद्वासुदेवेन तदैवैतदुपस्थितम् ।। १९

आत्मन्यकारणेनैव भूतानां कारणेन च ।

सृष्ट्यर्थं वपुरात्तं हि वासुदेवमयात्मना ।। २०

आत्मावलोकनेनाशु माधवः परिदृश्यते ।

माधवाराधनेनाशु स्वयमात्मावलोक्यते ।। २१

एतां दृष्टिमवष्टभ्य राघवात्मावलोकने ।

विहराशु विचारात्मा पदं प्राप्स्यसि शाश्वतम् ।। २२

दुःखासारवती राम संसारप्रावृडातता ।

जाड्यं ददाति परमं विचारार्कमपश्यताम् ।। २३

प्रसादादात्मनो विष्णोर्मायेयमतिभासुरा ।

प्रबाधते न धीरांस्तु यक्षी मन्त्रवतो यथा ।। २४

आत्मेच्छयैव घनतां समुपागतान्त-

रात्मेच्छयैव तनुतामुपयाति काले ।

संसारजालरचनेयमनन्तमाया-

ज्वालेह वातवलयादिव पावकस्य ।। २५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते मो० उपशमप्रकरणे प्रह्लादव्यवस्था नाम द्विचत्वारिंशः सर्गः

।। ४२ ।।